**A. D. P.** सञ्ज्ञकादर्शेषु प्रतिलेखयित्रादिसूचका निम्नस्वरूपा उल्लेखा विद्यन्ते ।

A आदर्शस्थ उल्लेखः–

श्रीमालीवंशमुक्तातः सञ्जातो विवहारिकः ।
देवा इत्यभिधानस्तत्पत्नी हासलदेव्यभूत् ॥ १ ॥
तयोर्जाता पु(सु)ता एते प्रथमो मांडणाह्वयः ।
पद्मसिंहो द्वितीयोऽभूत् मालदेवस्तृतीयकः ॥ २ ॥
लिखापितः प्रमोदात्तैस्तीर्थकल्पोऽयमुत्तमः ।
स्वकीयमातृपितॄणां श्रेयार्थं पुण्यवृद्धये ॥ ३ ॥
षट्षष्टिवत्सरे जाते चतुर्दशशताधिके ।
श्रीविक्रमभूपालात् भाद्रशुद्धजयातिथौ ॥ ४ ॥

---

D आदर्शगत उल्लेखः–

अकब्बरोर्वीरमणप्रदत्तजगद्गुरुख्यातिधरो बभूव ।
श्रीहीरसूरिर्विजयं दधानः श्रीवर्द्धमानप्रभुशासनेऽस्मिन् ॥ १ ॥
तदीयपट्टाम्बरभानुमाली सूरीश्वरः श्रीविजयादिसेनः ।
तपागणं यः प्रथितं चकार विजित्य भूपालसभे द्विजौघम् ॥ २ ॥
श्रीविजयतिलकसञ्ज्ञे सूरिवरे तत्पदे श्रियं श्रयति ।
वैराग्यवासितान्तःकरणैः शुद्धोपदेशरतैः ॥ ३ ॥
हैमगुरुवृत्तिकाव्यप्रकाशमणिमुख्यशास्त्रनिष्णातैः ।
श्रीविजयसेनसूरीश्वरशिष्यै रामविजयबुधैः ॥ ४ ॥
पञ्चदशलक्षपुस्तकचित्को [ शो ] ज्ञानभक्तये विहितः ।
आचन्द्रार्कं नन्दतु विज्ञजनैर्वाच्यमानोऽसौ ॥ ५ ॥

---

P आदर्शस्थित उल्लेखः–

॥ संवत् १५६९ वर्षे चैत्रादौ संवच्छरे । आषाढमासे । शुक्लप्रतिपदिने । सोमवासरे । पुनर्वसुनक्षत्रे । वैरिसिंहपुरे । श्रीमालज्ञातीय । बहकटा गोत्रे । महं० जिणदत्तपुत्रप्रवरप्रासादपौषधशालादि पुण्यकार्यकरण सावधानचित्त । सप्तक्षेत्रसफलकृत निजवित्त । धर्मधुरंधर । महं० भोजा भार्या वइजलदे पुत्र । एकांतदेवगुरुभक्त । श्रीशांतिनाथचरणकमलार्चनासक्त । महं० रायमल भार्या सरसतिपुत्र चिरं० लषणसी महणसी द्वि० भा० करमाई प्रमुष पुत्र परिवारसहितेन महं० रायमलसुश्रावकेण सर्वतीर्थकल्पग्रंथो लेष ( ख ) यित्वा दत्तः । श्रीखरतरगच्छे । पूज्य म० श्रीजिनभद्रसूरिपदे श्रीजिनचंद्रसूरिशिष्य श्रीजिनेश्वर सूरिशिष्य वा० साधुकीर्तिगणीनां समर्पितश्च ॥ सकलसंघस्य शुभं भवतु ॥ कल्याणमस्तु ॥ छ ॥